Institut Français de Pondichéry
IfP

Collection Indologie - 100.2

Rashtriya Sanskrit Sansthan

संस्कृतवर्षस्मृतिग्रन्थमाला - ७

# शाब्दबोधमीमांसा

# ŚĀBDABODHAMĪMĀṂSĀ

## AN INQUIRY INTO INDIAN THEORIES OF VERBAL COGNITION

### सुबर्थविचारात्मकः द्वितीयो भागः

### PART II - CASE TERMINATIONS AND THEIR SIGNIFICANCE



By

N.S. RAMANUJA TATACHARYA

COLLECTION INDOLOGIE – 100.2
संस्कृतवर्षस्मृतिग्रन्थमाला – ७

# शाब्दबोधमीमांसा

# ŚĀBDABODHAMĪMĀṂSĀ

## An Inquiry into Indian Theories of Verbal Cognition

## सुबर्थविचारात्मकः द्वितीयो भागः

## Part II - Case Terminations and Their Significance

By
N.S. Ramanuja Tatacharya

INSTITUT FRANÇAIS DE PONDICHÉRY
RASHTRIYA SANSKRIT SANSTHAN

।। श्रीः ।।

# शाब्दबोधमीमांसायां

# सुबर्थविचारात्मकस्य द्वितीयभागस्य

# भूमिका

अस्माभिः संकल्पितायां शाब्दबोधमीमांसायां वाक्यवाक्यार्थविचारात्मकः प्रथमो भागः अतिविस्तृतः अचिरात् प्रकाशमुपगतः। इदानीं सुबर्थविचारात्मकः द्वितीयो भागः प्रथमभागात् अपि विस्तृतः प्रकाश्यते। तत्र आदौ अवश्यज्ञातव्यं किंचित् संगृह्यते।

शब्दस्तावत् द्विविधः सार्थकः निरर्थकश्चेति। ध्वन्यात्मकः शब्दो निरर्थकः। सार्थकः शब्दः प्रकृतिः प्रत्ययः निपातश्चेति त्रिविधः। प्रकृतिः नाम धातुश्चेति द्विविधा। नामैव प्रातिपदिकमित्यप्युच्यते। नाम चतुर्विधं रूढं लक्षकं योगरूढं यौगिकं चेति। परे तु यौगिकरूढमधिकमन्तर्भाव्य नाम पञ्चविधमाहुः। रूढं संज्ञेत्यपि कीर्त्यते। संज्ञा च नैमित्तिकी पारिभाषिकी औपाधिकी चेति त्रिविधा। लक्षकं नामापि, लक्षणायाः जहत्स्वार्था अजहत्स्वार्था निरूढा आधुनिकी इत्यादिभेदमनुसृत्य अनेकविधं भवति। योगरूढं सामासिकं तद्धितान्तं चेति द्विविधम्। कृदन्तस्य पङ्कजादेः सामासिकेऽन्तर्भावात् न त्रैविध्यशङ्का। यौगिकं नाम समासः तद्धितान्तं कृदन्तं चेति त्रिविधम्। समासः कर्मधारय-द्विगु-तत्पुरुषाव्ययीभाव-बहुव्रीहि-द्वन्द्व-भेदात् षड्विधः।

धातुः मूलधातुः सौत्रः प्रत्ययान्तश्चेति त्रिविधः। प्रत्ययः चतुर्विधः विभक्तिः धात्वंशः तद्धितं कृत् इति। धात्वंशः सन्, क्यच् प्रभृतिः। विभक्तिः द्विविधा सुप् तिङ् चेति। सुप् प्रथमादिभेदेन सप्तविधा। सा पुनर्द्विविधा कारकार्था कारकेतरार्था चेति। कारकेतरार्था विभक्तिः उपपदविभक्तिरित्युच्यते। तत्र कारकं षड्विधम् अपादानसंप्रदानकरणाधिकरणकर्मकर्तृभेदात्। तिङ् लडादिभेदेन दशविधा। लडादयः परस्मैपदात्मनेपदभेदेन द्विविधाः। धात्वंशप्रत्ययः द्विविधः नामप्रकृतिकः धातुप्रकृतिकश्चेति। आद्यः क्यच्क्यङादिः। द्वितीयः सन्यञादिः। अर्थभेदेन तद्धितोऽनेकविधः।

# विषयसूची

## कारकलक्षणम् पृ. 1-35


१. सुबर्थविचारस्य प्राग्रूपम् ........ 1
२. शब्दशक्तिप्रकाशिकानुसारेण प्रकृतित्वप्रत्ययत्वविभक्तित्वानां निर्वचनम् ........ 2
३. प्रकृतिलक्षणम् ........ 3
 १. स्वेतरार्थानवच्छिन्नेति विशेषणस्य प्रयोजनम् ........ 3
 २. प्रकारान्तरेण प्रकृतिलक्षणम् ........ 4
४. प्रत्ययलक्षणम् ........ 4
 १. प्रकारान्तरेण प्रत्ययलक्षणम् ........ 7
५. विभक्तिलक्षणम् ........ 7
६. शब्दशक्तिप्रकाशिकानुसारेण सुपां लक्षणम् ........ 8
७. विभक्त्यर्थनिर्णयानुसारेण विभक्तित्वादिनिर्वचनम् ........ 8
 १. पूर्वपक्षः ........ 8
 २. सिद्धान्तः ........ 10
 ३. प्रत्ययत्वनिर्वचनम् ........ 11
 ४. प्रकृतिलक्षणम् ........ 14
८. न्यायदर्शनानुसारेण कारकत्वनिर्वचनम् ........ 15
९. न्यायवार्तिकरीत्या कारकशब्दार्थः ........ 15
१०. तात्पर्यटीकायां कारकशब्दार्थः ........ 15
११. वार्तिके कारकशब्दार्थः ........ 16
१२. तात्पर्यटीकायां च कारकशब्दार्थः ........ 16
१३. सुबर्थविचारः शब्दशक्तिप्रकाशिङ्कानुसारेण ........ 16
१४. शब्दशक्तिप्राकाशिकोक्तं कारकलक्षणम् ........ 17
१५. कारकचक्रोक्तं कारकलक्षणम् ........ 18
१६. बृहन्मञ्जूषानुसारेण कारकलक्षणम् ........ 19
१७. लघुमञ्जूषायां कारकत्वनिरुक्तिः ........ 20

नान्वितायां भावनायां प्रवर्तनान्वयः। यथा 'स्वर्गकामो यजेत' 'विश्वजिता यजेत' इत्यादौ स्वर्गकामशब्दोपात्तेन आक्षिप्तेन वा स्वर्गेण भाव्येन सकर्मिकायां भावनायां, तत्र धात्वर्थस्य न कर्मतया अन्वयः। एककर्मावरुद्धे कर्मान्तरस्यानाकाङ्क्षितत्वात्। किं तु करणतया। अत एव 'यजेत' इत्यस्य यागेन स्वर्गं भावयेदिति विवरणम्। एवं सति यागकरणिकायाः स्वर्गोत्पत्तेरनुकूलो व्यापारः प्रवर्तनागोचर इति वाक्यार्थबोधः। तत्र प्रवर्तना शब्दधर्मः। स च समवेतोऽतिरिक्तपदार्थः प्रवृत्तितात्पर्यकत्वं वेत्यन्यदेतत्। अत एव करणतयान्वितस्य यागस्य विशेषणवाचिपदात् तृतीया यथा "ज्योतिष्टोमेन यजेत, वाजपेयेन यजेत" इत्यादौ कर्मनामधेयात् ज्योतिष्टोमपदात् वाजपेयपदाच्च तृतीया 'कुटिलेन दण्डेन गां कालय' इत्यत्र कालनकरणदण्डविशेषणकुटिलपदादिव उपपद्यते इति भाट्टमतविवेकः।

## विभक्त्यर्थनिर्णये[१] भाट्टमतपरिशीलनम्

अस्मिन्मते तिङर्थभावनाफलोत्पत्त्यन्वितस्य आधेयत्वस्य द्वितीयार्थत्वे 'ओदनं पचति' इतिवत् "स्वर्गं यजेत" इत्यादिप्रयोगप्रसङ्गः। "तण्डुलं पचति ग्रामं गच्छति" इत्यादौ तण्डुलयागयोर्भाव्यत्वविरहेण तण्डुलग्रामपदाभ्यां द्वितीयानुपपत्तिश्च। न चात्र संबन्धः संबन्धधीर्वा द्वितीयार्थः। तथा च तण्डुलसंबन्धिपाकग्रामसंबन्धिगमनयोरेवात्र प्रतीतिरिति वाच्यम्। तथा ग्रामो गमिकर्मेति प्रतीतिव्यवहारयोरनुपपत्तेः। भाव्यत्वसंस्कारत्वाभ्यां विना तदभिव्यङ्ग्यस्य अतिरिक्तस्य कर्मत्वस्याप्यभावेन कर्मत्वप्रतीतिव्यवहारयोरुत्पत्त्यसंभवादिकं चिन्तनीयम्।

## विभक्त्यर्थनिर्णये[२] भेदस्य द्वितीयार्थत्वे आक्षेपः

ननु भेदस्य द्वितीयार्थत्वे 'आत्मानमात्मना वेत्सि' इत्यादौ कथं भेदान्वयः? कर्तृकर्मणोः युष्मदात्मशब्दार्थयोः ऐक्यात्। शाब्दिकमते परया कर्तृसंज्ञया कर्मसंज्ञया कर्मसंज्ञायाः बाधात् दर्शितस्थले द्वितीयाया एवानुपपत्तिः।

न च युष्मदात्मशब्दार्थयोरवच्छेदकभेदेन भेदोपगमादैक्येऽपि कर्तृत्वकर्मत्वोपपत्तिरिति वाच्यम्। अवच्छेदकभेदेन भेदोपगमस्य बाह्यमतप्रवेशप्रसञ्जकत्वात्। तथा सति "चैत्रश्चैत्रं गच्छति" इति प्रयोगप्रसङ्गाच्च। तथा चोभयमते प्रकृतानुपपत्तिरिति चेत्—

---

[१] पृ. १०७
[२] पृ. १३०

# ŚĀBDABODHAMĪMĀṂSĀ

## PART II - CASE TERMINATIONS AND THEIR SIGNIFICANCE

Under the project entitled *An Inquiry into Indian Theories of Verbal Cognition* consisting of four volumes, the present one is the second in the series. It deals with the significance of the nominal case terminations. In this volume, Professor Ramanuja Tatacharya offers a profound and well organized account of the views of the Naiyayikas, Vaiyakaranas and the Mimamsakas in regard to this subject. Clearness of thought, soundness of reasoning, and freedom from bias underlie the presentation of the view points of the authors of these schools of thought.

Professor Ramanuja Tatacharya is one of the senior authorities in the fields of Nyaya, *Vyākarana, Purvamimamsa* and *Uttaramimamsa*. Since retiring as Vice Chancellor of the Rashtriya Sanskrit Vidyapeetha of Tirupati, he has been associated with the French Institute of Pondicherry as Honorary Professor.

Professor Ramanuja Tatacharya has published commentaries on the higher texts of *Nyāya* such as the *Nilakanthaprakasika*, the *Gadadhari* on the *Pañcalaksani, Caturdasalaksani, Paksata*, and *Avayava*. His commentary on the *Muktavalidinakari* is awaiting publication. His work entitled *Pratyaksatattvacintāmanivimarsa* is an interpretative exposition of the *Pratyaksakhanda* of the *Tattvacintamani* of *Gangesa*. He has critically edited and commented on the *Pratyaksakhanda* and the *Anumanakhanda* of that work. In the field of *Vyakarana* he made a critical edition of the *Jñapakasangraha* of *Nagesa* with his commentary, the *Vivrti*. He has also written an independent work entitled the *Jñapakasangrahaparisista*, with an auto commentary. His commentary on the *Gopālasahasranāmastotra* entitled the *Bhagavadgunaratnapetika* may best be characterized as a *bhāsya* thereon.

In recognition of Professor Ramanuja Tatacharya's profound scholarship, His Excellency the President of India has conferred upon him the Certificate of Honour for Proficiency in Sanskrit, and the Head of the Sri Raghavendra Svami Matha at Mantralaya and the Vedantadesika Sampradaya Sabha, have bestowed on him the titles of *Tarkavācaspati* and *Sāstraratnākara* respectively. He has also received the Ramakrishna Dalmia Srivani Alankaran of the Ramakrishna Dalmia Srivani Nyas, and Vacaspati Puraskar of the Birla Foundation.